(1)

sem - 1 core ending course code

CC - A1

अधीती व्याकरणे - पूर्वं कर्मविवक्षाया भावे क्तप्रत्यये अधीतशब्दात् कर्तरि 'इष्टादिभ्यश्च' इतीनि प्रत्यये, ततः कर्मविशेषः जिज्ञासायां कर्मत्वेन सम्बद्धात् व्याकरणात् 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' इति वार्तिकेन सप्तमी 'अधीती व्याकरणे' इति।

यागाय याति - अत्र यष्टुं यातीत्यर्थे 'भाववचनाश्च' इति सूत्रेण यो विहितः प्रत्ययः तदन्तशब्दात् 'तुमर्थाच्च भाववचनात्' इति सूत्रेण चतुर्थी 'यागाय याति' इति।

अध्ययनेन वसति - अत्र फलमपि हेतुफलभूतं अध्ययनं 'हेतौ' इत्यनेन तृतीया। न चात्र अध्ययनस्य गुरुकुलवासं प्रति न हेतुत्वं प्रत्युत

अध्ययनस्यैव ②वाससाध्यत्वमिति वाच्यम्, फलमपि हेतुरिति मूले उक्तत्वात्। तादर्थ्यविवक्षायां तु 'अध्ययनाय वसति' इत्यपि भवति

<u>मुखेन त्रिलोचनः</u> - इतिस्थिते 'येनाङ्गविकारः' इत्यनेन सूत्रेण 'मुखेन' इत्यत्र अङ्गविकारे तृतीया विभक्ति भवति।

<u>प्रासादात् प्रेक्षते</u> - 'प्रासादात् प्रेक्षते' इति स्थिते ल्यपलोपे कर्मण्यधिकरणे च इत्यनेन वार्त्तिकेन 'प्रासादम् आरुह्य' इत्यत्र ल्यपप्रत्यान्तस्य आरुह्य इति पदस्य कर्मणि प्रासादम् इत्यत्र अनेन वार्त्तिकेन पञ्चमी विभक्ति भवति।

<u>दिवः कर्म च</u> - दिव् धातु सः अत्यन्त सहायक तत्र द्वौ कारक भवति। दण्कपद्धे करण कारके तृती

विभक्ति, एवं अपरपक्षे कर्म कारके द्वितीया विभक्ति भवति।

कुरून् स्वपिति – इति स्थिते 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा' इत्यनेन वार्तिकेन 'कुरून्' इत्यत्र देशवाचक पदे कर्मसंज्ञायां 'कर्मणि द्वितीया' इत्यनेन सूत्रेण कुरून् इत्यत्र कर्मकारके द्वितीया विभक्ति भवति।

अनु हरिं सुराः – अनु हरिं सुराः इति स्थिते 'हीने' इत्यनेन सूत्रेण अनु इत्यस्य हीने अर्थे कर्मप्रवचनीय संज्ञायां 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यनेन सूत्रेण 'अनु' इति कर्मप्रवचनीय योगे हरि इत्यत्र द्वितीया विभक्ति भवति।